# 5 अनुबन्धम्

## 5.1 नमकप्रश्नः

1.1 नम॑स्ते रुद्र म॒न्यव॑ उ॒तो त॒ इष॑वे॒ नमः॑ ।
नम॑स्ते अस्तु॒ धन्व॑ने बा॒हुभ्या॑मु॒त ते॒ नमः॑ ॥

1.2 या त॒ इषुः॑ शि॒वत॑मा शि॒वं ब॒भूव॑ ते॒ धनुः॑ ।
शि॒वा श॑र॒व्या॑ या तव॒ तया॑ नो रुद्र मृडय ॥

1.3 या ते॑ रुद्र शि॒वा त॒नूरघो॒राऽपा॑पकाशिनी ।
तया॑ नस्त॒नुवा॒ शन्त॑मया॒ गिरि॑शन्ता॒भिचा॑कशीहि ॥

1.4 यामिषुं॑ गिरिशंत॒ हस्ते॒ बिभ॒र्ष्यस्त॑वे ।
शि॒वां गि॑रित्र॒ तां कु॑रु॒ मा हिग्ँ॑सीः॒ पुरु॑षं॒ जग॑त् ॥

1.5 शि॒वेन॒ वच॑सा त्वा॒ गिरि॒शाच्छा॑वदामसि ।
यथा॑ नः॒ सर्व॒मिज्जग॑दय॒क्ष्मग्ँ सु॒मना॒ अस॑त् ॥

1.6 अध्य॑वोचदधिव॒क्ता प्र॑थ॒मो दैव्यो॑ भि॒षक् ।
अहीग्ँ॑श्च सर्वा॑ञ्ज॒म्भय॒न्त्सर्वा॑श्च यातुधा॒न्यः॑ ॥

1.7 अ॒सौ यस्ता॒म्रो अ॑रु॒ण उ॒त ब॒भ्रुः सु॑म॒ङ्गलः॑ ।
ये चे॒माग्ँ रु॒द्रा अ॒भितो॑ दि॒क्षु श्रि॒ताः स॑हस्र॒शोऽवैषा॒ग्ँ॒ हेड॑ ईमहे ॥

1.8 अ॒सौ यो॑ऽव॒सर्प॑ति॒ नील॑ग्रीवो॒ विलो॑हितः ।
उ॒तैनं॑ गो॒पा अ॑दृश॒न्नदृ॑शन्नुदहा॒र्यः॑ ।
उ॒तैनं॒ विश्वा॑ भू॒तानि॒ स दृ॒ष्टो मृ॑डयाति नः ॥

1.9 नमो॑ अस्तु॒ नील॑ग्रीवाय सहस्रा॒क्षाय॑ मी॒ढुषे॑ ।
अथो॒ ये अ॑स्य॒ सत्वा॑नो॒ऽहं तेभ्यो॑ऽकर॒न् नमः॑ ॥

1.10 प्रमु॑ञ्च॒ धन्व॑न॒स्त्व मु॒भयो॒ रार्त्नि॑यो॒ ज्याम् ।
याश्च॑ ते॒ हस्त॒ इष॑वः॒ परा॒ ता भ॑गवो वप ॥

1.11 अ॒व॒तत्य॒ धनु॒स्तवग्ँ सह॑स्राक्ष॒ शते॑षुधे ।
नि॒शीर्य॑ श॒ल्यानां॒ मुखा॑ शि॒वो नः॑ सु॒मना॑ भव ॥

1.12 विज्यं॒ धनुः॑ कप॒र्दिनो॒ विश॑ल्यो॒ बाण॑वाग्ँ उ॒त ।
अने॑शन्न॒स्येष॑व आ॒भुर॑स्य निष॒ङ्गथिः॑ ॥
1.13 या ते॑ हे॒तिर्मी॑ढुष्टम॒ हस्ते॑ ब॒भूव॑ ते॒ धनुः॑ ।
तया॒ऽस्मान् वि॒श्वत॒स्त्वम॑य॒क्ष्मया॒ परि॑ब्भुज ॥
1.14 नम॑स्ते अ॒स्त्वायु॑धा॒याना॑तताय धृ॒ष्णवे॑ ।
उ॒भाभ्या॑मु॒त ते॒ नमो॑ बा॒हुभ्यां॒ तव॒ धन्व॑ने ॥
1.15 परि॑ ते॒ धन्व॑नो हे॒तिर॒स्मान्वृ॑णक्तु वि॒श्वतः॑ ।
अथो॒ य इ॑षु॒धिस्तवा॒रे अ॒स्मन्निधे॑हि॒ तम् ॥
2.1 नमो॒ हिर॑ण्यबाहवे सेना॒न्ये॑ दि॒शां च॒ पत॑ये॒ नमो॒
2.2 नमो॑ वृ॒क्षेभ्यो॒ हरि॑केशेभ्यः पशू॒नां पत॑ये॒ नमो॒
2.3 नमः॑ स॒स्पिञ्ज॑राय॒ त्विषी॑मते पथी॒नां पत॑ये॒ नमो॒
2.4 नमो॑ बभ्लु॒शाय॑ विव्या॒धिनेऽन्ना॑नां॒ पत॑ये नमो॒
2.5 नमो॒ हरि॑केशायोपवी॒तिने॑ पु॒ष्टानां॒ पत॑ये नमो॒
2.6 नमो॑ भ॒वस्य॑ हे॒त्यै जग॑तां॒ पत॑ये॒ नमो॒
2.7 नमो॑ रु॒द्राया॑तता॒विने॒ क्षेत्रा॑णां॒ पत॑ये॒ नमो॒
2.8 नमस्सू॒तायाह॑न्त्याय॒ वना॑नां॒ पत॑ये॒ नमो॒
2.9 नमो॒ रोहि॑ताय स्थ॒पत॑ये वृ॒क्षाणां॒ पत॑ये॒ नमो॒
2.10 नमो॑ म॒न्त्रिणे॑ वाणि॒जाय॒ कक्षा॑णां॒ पत॑ये नमो॒
2.11 नमो॑ भुवं॒तये॑ वारिवस्कृ॒तायौष॑धीनां॒ पत॑ये॒ नमो॒
2.12 नम॑ उ॒च्चैर्घो॑षायाक्र॒न्दय॑ते पत्ती॒नाम् पत॑ये॒ नमो॒
2.13 नमः॑ कृत्स्नवी॒ताय॒ धाव॑ते॒ सत्व॑नां॒ पत॑ये॒ नमः॑ ॥2॥
3.1 नमः॒ सह॑मानाय निव्या॒धिन॑ आव्या॒धिनी॑नां॒ पत॑ये॒ नमो॒
3.2 नमः॑ ककु॒भाय॑ निष॒ङ्गिणे॑ स्ते॒नानां॒ पत॑ये॒ नमो॒
3.3 नमो॑ निष॒ङ्गिण॑ इषुधि॒मते॒ तस्क॑राणां॒ पत॑ये॒ नमो॒
3.4 नमो॒ वञ्च॑ते परि॒वञ्च॑ते स्तायू॒नां पत॑ये॒ नमो॒
3.5 नमो॑ निचे॒रवे॑ परिच॒रायार॑ण्यानां॒ पत॑ये॒ नमो॒
3.6 नमः॑ सृका॒विभ्यो॒ जिघाग्ँ॑सद्भ्यो मुष्ण॒तां पत॑ये॒ नमो॒

3.7 नमोऽसिमद्भ्यो नक्तंचरंद्भ्यः प्रकृन्तानां पतंये नमो

3.8 नमं उष्णीषिनें गिरिचरायं कुलुञ्चानां पतंये नमो

3.9 नम इषुमद्भ्यो धन्वाविभ्यंश्च वो नमो

3.10 नमं आतन्वानेभ्यंः प्रतिदधांनेभ्यश्च वो नमो

3.11 नमं आयच्छंद्भ्यो विसृजद्भ्यंश्च वो नमो

3.12 नमोऽस्यंद्भ्यो विध्यंद्भ्यश्च वो नमो

3.13 नम आसीनेभ्यः शयांनेभ्यश्च वो नमो

314 नमंः स्वपद्भ्यो जाग्रंद्भ्यश्च वो नमो

3.15 नमस्तिष्ठंद्भ्यो धावंद्भ्यश्च वो नमो

3.16 नमंः सभाभ्यंः सभापंतिभ्यश्च वो नमो

3.17 नमो अश्वेभ्योऽश्वंपतिभ्यश्च वो नमंः ॥3॥

4.1 नमं आव्याधिनीँभ्यो विविध्यंन्तीभ्यश्च वो नमो

4.2 नम उगंणाभ्यस्तृगँ हतीभ्यंश्च वो नमो

4.3 नमों गृत्सेभ्यों गृत्सपंतिभ्यश्च वो नमो

4.4 नमो व्रातेंभ्यो व्रातंपतिभ्यश्च वो नमो

4.5 नमों गणेभ्यों गणपंतिभ्यश्च वो नमो

4.6 नमो विरूंपेभ्यो विश्वरुंपेभ्यश्च वो नमो

4.7 नमों महद्भ्यंः क्षुल्लकेभ्यंश्च वो नमो

4.8 नमों रथिभ्योंऽरथेभ्यंश्च वो नमो

4.9 नमो रथेंभ्यो रथंपतिभ्यश्च वो नमो

4.10 नमः सेनाँभ्यः सेनानिभ्यंश्च वो नमो

4.11 नमंः क्षत्तृभ्यंः संग्रहीतृभ्यंश्च वो नमो

4.12 नमस्तक्षंभ्यो रथकारेभ्यंश्च वो नमो

4.13 नमः कुलांलेभ्यः कर्मारेंभ्यश्च वो नमो

4.14 नमंः पुञ्जिष्टेंभ्यो निषादेभ्यंश्च वो नमो

4.15 नमं इषुकृद्भ्यों धन्वकृद्भ्यंश्च वो नमो

4.16 नमों मृगयुभ्यंः श्वनिभ्यंश्च वो नमो

4.17 नम॒ः श्वभ्य॒ः श्वप॑तिभ्यश्च वो॒ नम॑ः ॥4॥

5.1 नमो॑ भ॒वाय॑ च रु॒द्राय॑ च॒

5.2 नम॑ः श॒र्वाय॑ च पशु॒पत॑ये च॒

5.3 नमो॒ नील॑ग्रीवाय च शिति॒कण्ठा॑य च॒

5.4 नम॑ः कप॒र्दिने॑ च॒ व्यु॑प्तकेशाय च॒

5.5 नम॑ः सहस्रा॒क्षाय॑ च श॒तध॑न्वने च॒

5.6 नमो॑ गिरि॒शाय॑ च शिपिवि॒ष्टाय॑ च॒

5.7 नमो॑ मी॒ढुष्ट॑माय॒ चेषु॑मते च॒

5.8 नमो॑ ह्र॒स्वाय॑ च वाम॒नाय॑ च॒

5.9 नमो॑ बृह॒ते च॒ वर्षी॑यसे च॒

5.10 नमो॑ वृ॒द्धाय॑ च सं॒वृद्ध॑ने च॒

5.11 नमो॒ अग्रि॑याय च प्रथ॒माय॑ च॒

5.12 नम॑ आ॒शवे॑ चाजि॒राय॑ च॒

5.13 नम॒ः शीघ्रि॑याय च॒ शीभ्या॑य च॒

5.14 नम॑ ऊ॒र्म्या॑य चावस्व॒न्या॑य च॒

5.15 नम॑ः स्रोत॒स्या॑य च॒ द्वीप्या॑य च ॥5॥

6.1 नमो॑ ज्ये॒ष्ठाय॑ च कनि॒ष्ठाय॑ च॒

6.2 नम॑ः पूर्व॒जाय॑ चापर॒जाय॑ च॒

6.3 नमो॑ मध्य॒माय॑ चापग॒ल्भाय॑ च॒

6.4 नमो॑ जघ॒न्या॑य च॒ बुध्नि॑याय च॒

6.5 नम॑ः सो॒भ्या॑य च प्रतिस॒र्या॑य च॒

6.6 नमो॒ याम्या॑य च॒ क्षेम्या॑य च॒

6.7 नम॑ उर्व॒र्या॑य च॒ खल्या॑य च॒

6.8 नम॒ः श्लोक्या॑य चाऽवसा॒न्या॑य च॒

6.9 नमो॒ वन्या॑य च॒ कक्ष्या॑य च॒

6.10 नम॑ः श्र॒वाय॑ च प्रतिश्र॒वाय॑ च॒

6.11 नम॑ आ॒शुषे॑णाय चा॒शुर॑थाय च॒

6.12 नम॒ः शूरा॑य चावभिन्द॒ते च॒

6.13 नमो॑ व॒र्मिणे॑ च वरू॒थिने॑ च॒

6.14 नमो॑ बि॒ल्मिने॑ च कव॒चिने॑ च॒

6.15 नम॑ः श्रु॒ताय॑ च श्रुतसे॒नाय॑ च ॥ 6॥

7.1 नमो॑ दुन्दु॒भ्या॑य चाहन॒न्या॑य च॒

7.2 नमो॑ धृ॒ष्णवे॑ च प्रमृ॒शाय॑ च॒

7.3 नमो॑ दू॒ताय॑ च॒ प्रहि॑ताय च॒

7.4 नमो॑ निष॒ङ्गिणे॑ चेषुधि॒मते॑ च॒

7.5 नम॑स्ती॒क्ष्णेष॑वे चायु॒धिने॑ च॒

7.6 नम॑ः स्वायु॒धाय॑ च सु॒धन्व॑ने च॒

7.7 नम॒ः स्रुत्या॑य च॒ पथ्या॑य च॒

7.8 नम॑ः का॒ट्या॑य च नी॒प्या॑य च॒

7.9 नम॒ः सूद्या॑य च सर॒स्या॑य च॒

7.10 नमो॑ ना॒द्याय॑ च वैश॒न्ताय॑ च॒

7.11 नम॒ः कूप्या॑य चाव॒ट्या॑य च॒

7.12 नमो॒ वर्ष्या॑य चाव॒र्ष्याय॑ च॒

7.13 नमो॑ मे॒घ्या॑य च विद्यु॒त्या॑य च॒

7.14 नम॑ ई॒ध्रिया॑य चात॒प्या॑य च॒

7.15 नमो॒ वात्या॑य च॒ रेष्मि॑याय च॒

7.16 नमो॑ वास्त॒व्या॑य च वास्तु॒पाय॑ च ॥ 7॥

8.1 नम॒ः सोमा॑य च रु॒द्राय॑ च॒

8.2 नम॑स्ता॒म्राय॑ चारु॒णाय॑ च॒

8.3 नम॑ः श॒ङ्गाय॑ च पशु॒पत॑ये च॒

8.4 नम॑ उ॒ग्राय॑ च भी॒माय॑ च॒

8.5 नमो॑ अग्रेव॒धाय॑ च दूरेव॒धाय॑ च॒

8.6 नमो॑ ह॒न्त्रे च॒ हनी॑यसे च॒

8.7 नमो॑ वृ॒क्षेभ्यो॒ हरि॑केशेभ्यो॒

8.8 नम॑स्ता॒राय॒

8.9 नम॑श्शं॒भवे॑ च मयो॒भवे॑ च॒

8.10 नम॑: शंक॒राय॑ च मयस्क॒राय॑ च॒

8.11 नम॑: शि॒वाय॑ च शि॒वत॑राय च॒

8.12 नम॒स्तीर्थ्या॑य च॒ कूल्या॑य च॒

8.13 नम॑: पा॒र्या॑य चावा॒र्या॑य च॒

8.14 नम॑: प्र॒तर॑णाय चो॒त्तर॑णाय च॒

8.15 नम॑ आता॒र्या॑य चाला॒द्या॑य च॒

8.16 नम॒: शष्प्या॑य च॒ फेन्या॑य च॒

8.17 नम॑: सिक॒त्या॑य च प्रवा॒ह्या॑य च ॥ 8॥

9.1 नम॑ इरि॒ण्या॑य च प्रप॒थ्या॑य च॒

9.2 नम॑: किग्ँ शि॒लाय च॒ क्षय॑णाय च॒

9.3 नम॑: कप॒र्दिने॑ च पुल॒स्तये॑ च॒

9.4 नमो॒ गोष्ठ्या॑य च॒ गृह्या॑य च॒

9.5 नम॒स्तल्प्या॑य च॒ गेह्या॑य च॒

9.6 नम॑: का॒ट्या॑य च गह्व॒रे॒ष्ठाय॑ च॒

9.7 नमो॑ ह्रद॒य्या॑य च निवे॒ष्प्या॑य च॒

9.8 नम॑: पाग्ँ स॒व्या॑य च रज॒स्या॑य च॒

9.9 नम॒: शुष्क्या॑य च हरि॒त्या॑य च॒

9.10 नमो॒ लोप्या॑य चोल॒प्या॑य च॒

9.11 नम॑ ऊ॒र्व्या॑य च सू॒र्म्या॑य च॒

9.12 नम॑: प॒र्ण्या॑य च पर्णश॒द्या॑य च॒

9.13 नमो॑ऽपगु॒रमा॑णाय चाभिघ्न॒ते च॒

9.14 नम॑ आख्खिद॒ते च॑ प्रख्खिद॒ते च॒ ।

9.15 नमो॑ वः किरि॒केभ्यो॑ दे॒वाना॒ग्ँ हृद॑येभ्यो॒

9.16 नमो॑ विक्षीण॒केभ्यो॒

9.17 नमो॑ विचिन्व॒त्केभ्यो॒

9.18 नम॑ आनिर्ह॒तेभ्यो॒

9.19 नम॑ आमीव॒त्केभ्य॑ः ॥ 9॥

10.1 द्रापे॒ अन्ध॑सस्पते॒ दरि॑द्र॒न्नील॑लोहित ।
एषां पुरु॑षाणाम॒षां प॑शू॒नां मा भेर्माऽरो॒ मो ए॑षा॒ं किंच॒नाम॑मत् ॥

10.2 या ते॑ रुद्र शि॒वा त॒नूः शि॒वा वि॒श्वाह॑ भेषजी ।
शि॒वा रु॒द्रस्य॑ भेष॒जी तया॑ नो मृड जी॒वसे॑ ॥

10.3 इ॒माग्ं॒ रु॒द्राय॑ त॒वसे॑ कप॒र्दिने॑ क्ष॒यद्वी॑राय॒ प्रभ॑रामहे म॒तिम् ।
यथा॑ नः॒ शमस॑द् द्वि॒पदे॒ चतु॑ष्पदे॒ विश्वं॑ पु॒ष्टं ग्रामे॑ अ॒स्मिन्नना॑तुरम् ॥

10.4 मृ॒डा नो॑ रुद्रो॒त नो॒ मय॑स्कृधि क्ष॒यद्वी॑राय॒ नम॑सा विधेम ते ।
यच्छं च॒ योश्च॒ मनु॑राय॒जे पि॒ता तद॑श्याम॒ तव॑ रुद्र॒ प्रणी॑तौ ॥

10.5 मा नो॑ म॒हान्त॑मु॒त मा नो॑ अर्भ॒कं मा न॒ उक्ष॑न्त-मु॒त मा न॑ उक्षि॒तम् ।
मा नो॑ऽवधीः पि॒तरं॒ मोत मा॒तरं॑ प्रि॒या मा न॑स्त॒नुवो॑ रुद्र रीरिषः ॥

10.6 मा न॑स्तो॒के तन॑ये॒ मा न॒ आयु॑षि॒ मा नो॒ गोषु॒ मा नो॒ अश्वे॑षु रीरिषः ।
वी॒रान् मा नो॑ रुद्र भामि॒तोऽव॑धी-र्ह॒विष्म॑न्तो॒ नम॑सा विधेम ते ॥

10.7 आ॒रात्ते॑ गो॒घ्न उ॒त पू॑रुष॒घ्ने क्ष॒यद्वी॑राय सु॒म्नम॒स्मे ते॑ अस्तु ।
रक्षा॑ च नो॒ अधि॑ च देव ब्रू॒ह्यधा॑ च नः॒ शर्म॑ यच्छ द्वि॒बर्हाः॑ ॥

10.8 स्तु॒हि श्रु॒तं ग॑र्त॒सदं॒ युवा॑नं मृ॒गन्न भी॒म-मु॑पह॒त्नुमु॒ग्रम् ।
मृ॒डा ज॑रि॒त्रे रु॑द्र॒ स्तवा॑नो अ॒न्यन्ते॑ अ॒स्मन्निव॑पन्तु॒ सेनाः॑ ॥

10.9 परि॑णो रु॒द्रस्य॑ हे॒तिर्वृ॑णक्तु॒ परि॑ त्वे॒षस्य॑ दुर्म॒तिर॑घा॒योः ।
अव॑ स्थि॒रा म॒घव॑द्भ्यस्तनुष्व॒ मीढ्व॑स्तो॒काय॒ तन॑याय मृडय ॥

10.10 मीढु॑ष्टम॒ शिव॑तम शि॒वो नः॑ सु॒मना॑ भव ।
प॒र॒मे वृ॒क्ष आयु॑धन्नि॒धाय॒ कृत्तिं॒ वसा॑न॒ आच॑र॒ पिना॑कं॒ बिभ्र॒दाग॑हि ॥

10.11 विकि॑रिद॒ विलो॑हित॒ नम॑स्ते अस्तु भगवः ।
यास्ते॑ स॒हस्रग्ं॑ हे॒तयो॒न्यम॒स्मन् निव॑पन्तु॒ ताः ॥

10.12 स॒हस्रा॑णि सहस्र॒धा बा॑हु॒वोस्तव॑ हे॒तयः॑ ।
तासा॒मीशा॑नो भगवः परा॒चीना॒ मुखा॑ कृधि ॥

11.1 स॒हस्रा॑णि सहस्र॒शो ये रु॒द्रा अधि॒ भूम्या॑म् ।

तेषाग्ँ॒ सहस्रयोज॒नेऽव॒धन्वा॑नि तन्मसि ॥

11.2 अ॒स्मिन् म॑ह॒त्य॑र्ण॒वें॑ऽन्तरि॑क्षे भ॒वा अधि॑ ॥

11.3 नील॑ग्रीवाः शिति॒कण्ठाः॑ श॒र्वा अ॒धः क्ष॑माच॒राः ॥

11.4 नील॑ग्रीवाः शिति॒कण्ठा॒ दिवग्ँ॒ रु॒द्रा उप॑श्रिताः ॥

11.5 ये वृ॒क्षेषु॑ स॒स्पिंज॑रा॒ नील॑ग्रीवा॒ विलो॑हिताः ॥

11.6 ये भू॒ताना॒मधि॑पतयो विशि॒खास॑ः कप॒र्दिन॑ः ॥

11.7 ये अन्ने॑षु वि॒विध्य॑न्ति॒ पात्रे॑षु॒ पिब॑तो॒ जनान्॑ ॥

11.8 ये प॒थां प॑थि॒रक्ष॑य ऐलबृ॒दा य॒व्युध॑ः ॥

11.9 ये ती॒र्थानि॑ प्र॒चर॑न्ति सृ॒काव॑न्तो निष॒ङ्गिण॑ः ॥

11.10 य ए॒ताव॑न्तश्च॒ भूयाग्ँ॑सश्च॒ दिशो॑ रु॒द्रा वि॑तस्थि॒रे ।

तेषाग्ँ॒ सहस्र-योज॒नेऽव॒धन्वा॑नि तन्मसि ॥

11.11 नमो॑ रु॒द्रेभ्यो॒ ये पृ॑थि॒व्यां यें॑ऽन्तरि॑क्षे॒ ये दि॒वि येषा॒मन्नं॒ वातो॑ व॒र्षमिष॑व॒स्

तेभ्यो॒ दश॒ प्राची॒र्दश॑ दक्षि॒णा दश॑ प्र॒तीची॒-र्दशोदी॑ची-र्दशो॒र्ध्वास्

तेभ्यो॒ नम॒स्ते नो॑ मृडयन्तु॒ ते यं द्वि॒ष्मो यश्च॑ नो॒ द्वेष्टि॒ तं वो॒ जम्भे॑ दधामि ॥

## 5.2 चमकप्रश्नः

(1) अग्ना॑विष्णू स॒जोष॑से॒मा व॑र्धन्तु वां॒ गिरः॑ । द्यु॒म्नैर्वाजे॑भि॒राग॑तम् ॥ वाज॑श्च मे प्रस॒वश्च॑ मे॒ प्रय॑तिश्च मे॒ प्रसि॑तिश्च मे धी॒तिश्च॑ मे॒ क्रतु॑श्च मे॒ स्वर॑श्च मे॒ श्लोक॑श्च मे श्रा॒वश्च॑ मे॒ श्रुति॑श्च मे॒ ज्योति॑श्च मे॒ सुव॑श्च मे प्रा॒णश्च॑ मेऽपा॒नश्च॑ मे व्या॒नश्च॒ मेऽसु॑श्च मे चि॒त्तं च॑ म॒ आधी॑तं च मे॒ वाक्च॑ मे॒ मन॑श्च मे॒ चक्षु॑श्च मे॒ श्रोत्रं॑ च मे॒ दक्ष॑श्च मे॒ बलं॑ च म॒ ओज॑श्च मे॒ सह॑श्च म॒ आयु॑श्च मे ज॒रा च॑ म आ॒त्मा च॑ मे त॒नूश्च॑ मे॒ शर्म॑ च मे॒ वर्म॑ च मे॒ऽङ्गा॑नि च मे॒ऽस्थानि॑ च मे॒ परूग्ँ॑षि च मे॒ शरी॑राणि च मे ॥

(2) ज्यैष्ठ्यं॑ च म॒ आधि॑पत्यं च मे म॒न्युश्च॑ मे॒ भाम॑श्च॒ मेऽम॑श्च॒ मेऽम्भ॑श्च मे जे॒मा च॑ मे महि॒मा च॑ मे वरि॒मा च॑ मे प्रथि॒मा च॑ मे व॒र्ष्मा च॑ मे द्राघु॒या च॑ मे वृ॒द्धं च॑ मे॒ वृद्धि॑श्च मे स॒त्यं च॑ मे श्र॒द्धा च॑ मे॒ जग॑च्च मे॒ धनं॑ च मे॒ वश॑श्च मे॒ त्विषि॑श्च मे क्री॒डा च॑ मे॒ मोद॑श्च मे जा॒तं च॑ मे जनि॒ष्यमा॑णं च मे सू॒क्तं च॑ मे सुकृ॒तं च॑ मे वि॒त्तं च॑ मे॒ वेद्यं॑ च मे भू॒तं च॑ मे भवि॒ष्यच्च॑ मे सु॒गं च॑ मे सु॒पथं॑ च म ऋ॒द्धं च॑ म॒ ऋद्धि॑श्च मे क्लृ॒प्तं च॑ मे॒ क्लृप्ति॑श्च मे म॒तिश्च॑ मे सुम॒तिश्च॑ मे ॥

(3) शं च॑ मे॒ मय॑श्च मे प्रि॒यं च॑ मेऽनुका॒मश्च॑ मे॒ काम॑श्च मे सौमन॒सश्च॑ मे भ॒द्रं च॑ मे॒ श्रेय॑श्च मे॒ वस्य॑श्च मे॒ यश॑श्च मे॒ भग॑श्च मे॒ द्रवि॑णं च मे य॒न्ता च॑ मे ध॒र्ता च॑ मे॒ क्षेम॑श्च मे॒ धृति॑श्च मे॒ विश्वं॑ च मे॒ मह॑श्च मे सं॒विच्च॑ मे॒ ज्ञात्रं॑ च मे॒ सूश्च॑ मे प्र॒सूश्च॑ मे॒ सीरं॑ च मे ल॒यश्च॑ म ऋ॒तं च॑ मे॒ऽमृतं॑ च मेऽय॒क्ष्मं च॒ मेऽना॑मयच्च मे जी॒वातु॑श्च मे दीर्घायु॒त्वं च॑ मेऽनमि॒त्रं च॒ मेऽभ॑यं च मे सु॒गं च॑ मे॒ शय॑नं च मे सू॒षा च॑ मे सु॒दिनं॑ च मे ॥

(4) ऊर्क्च॑ मे सू॒नृता॑ च मे॒ पय॑श्च मे॒ रस॑श्च मे घृ॒तं च॑ मे॒ मधु॑ च मे॒ सग्धि॑श्च मे॒ सपी॑तिश्च मे कृ॒षिश्च॑ मे॒ वृष्टि॑श्च मे॒ जैत्रं॑ च म॒ औद्भि॑द्यं च मे र॒यिश्च॑ मे॒ राय॑श्च मे पु॒ष्टं च॑ मे॒ पुष्टि॑श्च मे वि॒भु च॑ मे प्र॒भु च॑ मे ब॒हु च॑ मे॒ भूय॑श्च मे पू॒र्णं च॑ मे पू॒र्णत॑रं च॒ मेऽक्षि॑तिश्च मे॒ कूय॑वाश्च॒ मेऽन्नं॑ च॒ मेऽक्षु॑च्च मे व्री॒हिय॑श्च मे॒ यवाँ॑श्च मे॒ माषाँ॑श्च मे॒ तिलाँ॑श्च मे मु॒द्गाश्च॑ मे ख॒ल्वाँ॑श्च मे गो॒धूमाँ॑श्च मे म॒सुराँ॑श्च मे प्रि॒यंग॑वश्च॒ मेऽण॑वश्च मे श्या॒मकाँ॑श्च मे नी॒वाराँ॑श्च मे ॥

(5) अश्मा॑ च मे॒ मृत्ति॑का च मे गि॒रय॑श्च मे॒ पर्व॑ताश्च मे॒ सिक॑ताश्च मे॒ वन॒स्पत॑यश्च मे॒ हिर॑ण्यं च॒ मेऽय॑श्च मे॒ सीसं॑ च मे॒ त्रपु॑श्च मे श्या॒मं च॑ मे लो॒हं च॑ मे॒ऽग्निश्च॑ म॒ आप॑श्च मे वी॒रुध॑श्च म॒ ओष॑धयश्च मे कृष्टप॒च्यं च॑ मेऽकृष्टप॒च्यं च॑ मे ग्रा॒म्याश्च॑ मे प॒शव॑ आर॒ण्याश्च॑ य॒ज्ञेन॑ कल्पन्तां वि॒त्तं च॑ मे॒ वित्ति॑श्च मे भू॒तं च॑ मे॒ भूति॑श्च मे॒ वसु॑ च मे वस॒तिश्च॑ मे॒ कर्म॑ च मे॒ शक्ति॑श्च॒ मेऽर्थ॑श्च म॒ एम॑श्च म॒ इति॑श्च मे॒ गति॑श्च मे ॥

(6) अ॒ग्निश्च॑ म॒ इन्द्र॑श्च मे॒ सोम॑श्च म॒ इन्द्र॑श्च मे सवि॒ता च॑ म॒ इन्द्र॑श्च मे॒ सर॑स्वती च म॒ इन्द्र॑श्च मे पू॒षा च॑ म॒ इन्द्र॑श्च मे॒ बृह॒स्पति॑श्च म॒ इन्द्र॑श्च मे मि॒त्रश्च॑ म॒ इन्द्र॑श्च मे॒ वरु॑णश्च म॒ इन्द्र॑श्च मे॒ त्वष्टा॑ च म॒ इन्द्र॑श्च मे धा॒ता च॑ म॒ इन्द्र॑श्च मे॒ विष्णु॑श्च म॒ इन्द्र॑श्च मे॒ऽश्विनौ॑ च म॒ इन्द्र॑श्च मे म॒रुत॑श्च म॒ इन्द्र॑श्च मे॒ विश्वे॑ च मे दे॒वा इन्द्र॑श्च मे पृथि॒वी च॑ म॒ इन्द्र॑श्च मे॒ऽन्तरि॑क्षं च म॒ इन्द्र॑श्च मे॒ द्यौश्च॑ म॒ इन्द्र॑श्च मे॒ दिश॑श्च म॒ इन्द्र॑श्च मे मू॒र्धा च॑ म॒ इन्द्र॑श्च मे प्र॒जाप॑तिश्च म॒ इन्द्र॑श्च मे ॥

(7) अ॒गँ॒शुश्च॑ मे र॒श्मिश्च॒ मेऽदा॑भ्यश्च॒ मेऽधि॑पतिश्च म उपा॒गँ॒शुश्च॑ मेऽन्तर्या॒मश्च॑ म ऐन्द्रवाय॒वश्च॑ मे मैत्रावरु॒णश्च॑ म आश्वि॒नश्च॑ मे प्रतिप्र॒स्थान॑श्च मे शु॒क्रश्च॑ मे म॒न्थी च॑ म आग्रय॒णश्च॑ मे वैश्वदे॒वश्च॑ मे ध्रु॒वश्च॑ मे वैश्वान॒रश्च॑ म ऋतुग्र॒हाश्च॑ मेऽतिग्रा॒ह्या॑श्च म ऐन्द्रा॒ग्नश्च॑ मे वैश्वदे॒वश्च॑ मे मरुत्व॒तीया॑श्च मे माहे॒न्द्रश्च॑ म आदि॒त्यश्च॑ मे सावि॒त्रश्च॑ मे सारस्व॒तश्च॑ मे पौ॒ष्णश्च॑ मे पात्नीव॒तश्च॑ मे हारियोज॒नश्च॑ मे ॥

(8) इ॒ध्मश्च॑ मे ब॒र्हिश्च॑ मे॒ वेदि॑श्च मे॒ धिष्णि॑याश्च मे॒ स्रुच॑श्च मे चम॒साश्च॑ मे॒ ग्रावा॑णश्च मे॒ स्वर॑वश्च म उपर॒वाश्च॑ मेऽधि॒षव॑णे च मे द्रोणकल॒शश्च॑ मे वाय॒व्या॑नि च मे पूत॒भृच्च॑ म आधव॒नीय॑श्च म॒ आग्नी॑ध्रं च मे हवि॒र्धानं॑ च मे गृ॒हाश्च॑ मे॒ सद॑श्च मे पुरो॒डाशा॑श्च मे पच॒ताश्च॑ मेऽवभृ॒थश्च॑ मे स्वगाका॒रश्च॑ मे ॥

(9) अ॒ग्निश्च॑ मे घ॒र्मश्च॑ मे॒ऽर्कश्च॑ मे॒ सूर्य॑श्च मे प्रा॒णश्च॑ मेऽश्वमे॒धश्च॑ मे पृथि॒वी च॒ मेऽदि॑तिश्च मे॒ दिति॑श्च मे॒ द्यौश्च॑ मे॒ शक्व॑रीर॒ङ्गुल॑यो॒ दिश॑श्च मे य॒ज्ञेन॑ कल्पन्ता॒म् ऋक्च॑ मे॒ साम॑ च मे॒ स्तोम॑श्च मे॒ यजु॑श्च मे दी॒क्षा च॑ मे॒ तप॑श्च म ऋ॒तुश्च॑ मे व्र॒तं च॑ मेऽहोरा॒त्रयो॑र्वृ॒ष्ट्या बृ॑हद्रथन्त॒रे च॑ मे य॒ज्ञेन॑ कल्पेताम् ॥

(10) गर्भा॑श्च मे व॒त्साश्च॑ मे॒ त्र्यवि॑श्च मे त्र्य॒वी च॑ मे दित्य॒वाट् च॑ मे दित्यौ॒ही च॑ मे॒ पञ्चा॑विश्च मे पञ्चा॒वी च॑ मे त्रिव॒त्सश्च॑ मे त्रिव॒त्सा च॑ मे तुर्य॒वाट् च॑ मे तुर्यौ॒ही च॑ मे पष्ठ॒वाट् च॑ मे पष्ठौ॒ही च॑ म उ॒क्षा च॑ मे व॒शा च॑ म ऋष॒भश्च॑ मे वे॒हच्च॑ मेऽन॒ड्वाञ्च॑ मे धे॒नुश्च॑ म॒ आयु॑र्य॒ज्ञेन॑ कल्पतां प्रा॒णो य॒ज्ञेन॑ कल्पतामपा॒नो य॒ज्ञेन॑ कल्पतां व्या॒नो य॒ज्ञेन॑ कल्पतां॒ चक्षु॑र्य॒ज्ञेन॑ कल्पता॒गँ॒ श्रोत्रं॑ य॒ज्ञेन॑ कल्पतां॒ मनो॑ य॒ज्ञेन॑ कल्पतां॒ वाग्य॒ज्ञेन॑ कल्पतामा॒त्मा य॒ज्ञेन॑ कल्पतां य॒ज्ञो य॒ज्ञेन॑ कल्पताम् ॥

(11) एका॑ च मे ति॒स्रश्च॑ मे॒ पञ्च॑ च मे स॒प्त च॑ मे॒ नव॑ च म॒ एका॑दश च मे॒ त्रयो॑दश च मे॒ पञ्च॑दश च मे स॒प्तद॑श च मे॒ नव॑दश च म॒ एक॑वि॒ꣳशतिश्च मे॒ त्रयो॑वि॒ꣳशतिश्च मे॒ पञ्च॑वि॒ꣳशतिश्च मे स॒प्तवि॒गँ॒शतिश्च मे॒ नव॑वि॒ꣳशतिश्च म॒ एक॑त्रि॒ꣳशच्च मे॒ त्रय॑स्त्रि॒ꣳशच्च मे॒ चत॑स्रश्च मे॒ऽष्टौ च॑ मे॒ द्वाद॑श च मे॒ षोड॑श च मे वि॒ꣳश॒तिश्च॑ मे॒ चतु॑र्वि॒ꣳशतिश्च मे॒ऽष्टावि॒गँ॒शतिश्च मे॒ द्वात्रि॒गँ॒शच्च मे॒ षट्त्रि॒गँ॒शच्च मे चत्वरि॒गँ॒शच्च॑ मे॒ चतु॑श्चत्वारि॒ꣳशच्च मे॒ऽष्टाच॑त्वारि॒ꣳशच्च मे॒ वाज॑श्च प्रस॒वश्चा॑पि॒जश्च॒ क्रतु॑श्च॒ सुव॑श्च मू॒र्धा च॒ व्यश्नि॑यश्चान्त्याय॒नश्चान्त्य॑श्च भौव॒नश्च॒ भुव॑न॒श्चाधि॑पतिश्च ॥

## 5.3 अन्यानि रुद्रसूक्तानि

### 5.3.1 ऋग्वेदः → सूक्तम् 1.43

| | |
|---|---|
| ऋषिः | कण्वो घौरः |
| देवताः | रुद्रः, 3 रुद्रः, मित्रावरुणौ च, 7-9 सोमः। |
| छन्दः | गायत्री, 9 अनुष्टुप्। |

कद्रुद्राय प्रचेतसे मीळ्हुष्टमाय तव्यसे । वोचेम शंतमं हृदे ॥1॥
यथा नो अदितिः करत्पश्वे नृभ्यो यथा गवे । यथा तोकाय रुद्रियम् ॥2॥
यथा नो मित्रो वरुणो यथा रुद्रश्चिकेतति । यथा विश्वे सजोषसः ॥3॥
गाथपतिं मेधपतिं रुद्रं जलाषभेषजम् । तच्छंयोः सुम्नमीमहे ॥4॥
यः शुक्र इव सूर्यो हिरण्यमिव रोचते । श्रेष्ठो देवानां वसुः ॥5॥
शं नः करत्यर्वते सुगं मेषाय मेष्ये । नृभ्यो नारिभ्यो गवे ॥6॥
अस्मे सोम श्रियमधि नि धेहि शतस्य नृणाम् । महि श्रवस्तुविनृम्णम् ॥7॥
मा नः सोमपरिबाधो मारातयो जुहुरन्त । आ न इन्दो वाजे भज ॥8॥
यास्ते प्रजा अमृतस्य परस्मिन्धामन्नृतस्य । मूर्धा नाभा सोम वेन आभूषन्तीः सोम वेदः ॥9॥

### 5.3.2 ऋग्वेदः → सूक्तम् 1.114

| | |
|---|---|
| ऋषिः | कुत्स आङ्गिरसः |
| देवता | रुद्रः |
| छन्दः | जगती, 10-11 त्रिष्टुप्। |

इमा रुद्राय तवसे कपर्दिने क्षयद्वीराय प्र भरामहे मतीः ।
यथा शमसद्द्विपदे चतुष्पदे विश्वं पुष्टं ग्रामे अस्मिन्ननातुरम् ॥1॥
मृळा नो रुद्रोत नो मयस्कृधि क्षयद्वीराय नमसा विधेम ते ।
यच्छं च योश्च मनुरायेजे पिता तदश्याम तव रुद्र प्रणीतिषु ॥2॥

अश्याम ते सुमतिं देवयज्यया क्षयद्वीरस्य तव रुद्र मीढ्वः ।
सुम्नायन्निद्विशो अस्माकमा चरारिष्टवीरा जुहवाम ते हविः ॥3॥
त्वेषं वयं रुद्रं यज्ञसाधं वङ्कुं कविमवसे नि ह्वयामहे ।
आरे अस्मद्दैव्यं हेळो अस्यतु सुमतिमिद्वयमस्या वृणीमहे ॥4॥
दिवो वराहमरुषं कपर्दिनं त्वेषं रूपं नमसा नि ह्वयामहे ।
हस्ते बिभ्रद्भेषजा वार्याणि शर्म वर्म च्छर्दिरस्मभ्यं यंसत् ॥5॥
इदं पित्रे मरुतामुच्यते वचः स्वादोः स्वादीयो रुद्राय वर्धनम् ।
रास्वा च नो अमृत मर्तभोजनं त्मने तोकाय तनयाय मृळ ॥6॥
मा नो महान्तमुत मा नो अर्भकं मा न उक्षन्तमुत मा न उक्षितम् ।
मा नो वधीः पितरं मोत मातरं मा नः प्रियास्तन्वो रुद्र रीरिषः ॥7॥
मा नस्तोके तनये मा न आयौ मा नो गोषु मा नो अश्वेषु रीरिषः ।
वीरान्मा नो रुद्र भामितो वधीर्हविष्मन्तः सदमित्त्वा हवामहे ॥8॥
उप ते स्तोमान्पशुपा इवाकरं रास्वा पितर्मरुतां सुम्नमस्मे ।
भद्रा हि ते सुमतिर्मृळयत्तमाथा वयमव इत्ते वृणीमहे ॥9॥
आरे ते गोघ्नमुत पूरुषघ्नं क्षयद्वीर सुम्नमस्मे ते अस्तु ।
मृळा च नो अधि च ब्रूहि देवाधा च नः शर्म यच्छ द्विबर्हाः ॥10॥
अवोचाम नमो अस्मा अवस्यवः शृणोतु नो हवं रुद्रो मरुत्वान् ।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥11॥

### 5.3.3 ऋग्वेदः → सूक्तम् 2.33

| | |
|---|---|
| ऋषिः | गृत्समद (आङ्गिरसः शौनहोत्रः पश्चाद्) भार्गवः शौनकः |
| देवता | रुद्रः |
| छन्दः | त्रिष्टुप् |

आ ते पितर्मरुतां सुम्नमेतु मा नः सूर्यस्य संदृशो युयोथाः ।
अभि नो वीरो अर्वति क्षमेत प्र जायेमहि रुद्र प्रजाभिः ॥1॥
त्वादत्तेभी रुद्र शंतमेभिः शतं हिमा अशीय भेषजेभिः ।
व्यस्मद्द्वेषो वितरं व्यंहो व्यमीवाश्चातयस्वा विषूचीः ॥2॥
श्रेष्ठो जातस्य रुद्र श्रियासि तवस्तमस्तवसां वज्रबाहो ।
पर्षि णः पारमंहसः स्वस्ति विश्वा अभीती रपसो युयोधि ॥3॥
मा त्वा रुद्र चुक्रुधामा नमोभिर्मा दुष्टुती वृषभ मा सहूती ।
उन्नो वीराँ अर्पय भेषजेभिर्भिषक्तमं त्वा भिषजां शृणोमि ॥4॥
हवीमभिर्हवते यो हविर्भिरव स्तोमेभी रुद्रं दिषीय ।
ऋदूदरः सुहवो मा नो अस्यै बभ्रुः सुशिप्रो रीरधन्मनायै ॥5॥
उन्मा ममन्द वृषभो मरुत्वान्त्वक्षीयसा वयसा नाधमानम् ।
घृणीव च्छायामरपा अशीया विवासेयं रुद्रस्य सुम्नम् ॥6॥
क्व स्य ते रुद्र मृळयाकुर्हस्तो यो अस्ति भेषजो जलाषः ।
अपभर्ता रपसो दैव्यस्याभी नु मा वृषभ चक्षमीथाः ॥7॥
प्र बभ्रवे वृषभाय श्वितीचे महो महीं सुष्टुतिमीरयामि ।
नमस्या कल्मलीकिनं नमोभिर्गृणीमसि त्वेषं रुद्रस्य नाम ॥8॥
स्थिरेभिरङ्गैः पुरुरूप उग्रो बभ्रुः शुक्रेभिः पिपिशे हिरण्यैः ।
ईशानादस्य भुवनस्य भूरेर्न वा उ योषद्रुद्रादसुर्यम् ॥9॥
अर्हन्बिभर्षि सायकानि धन्वार्हन्निष्कं यजतं विश्वरूपम् ।
अर्हन्निदं दयसे विश्वमभ्वं न वा ओजीयो रुद्र त्वदस्ति ॥10॥
स्तुहि श्रुतं गर्तसदं युवानं मृगं न भीममुपहत्नुमुग्रम् ।
मृळा जरित्रे रुद्र स्तवानोऽन्यं ते अस्मन्नि वपन्तु सेनाः ॥11॥
कुमारश्चित्पितरं वन्दमानं प्रति नानाम रुद्रोपयन्तम् ।
भूरेर्दातारं सत्पतिं गृणीषे स्तुतस्त्वं भेषजा रास्यस्मे ॥12॥
या वो भेषजा मरुतः शुचीनि या शंतमा वृषणो या मयोभु ।
यानि मनुरवृणीता पिता नस्ता शं च योश्च रुद्रस्य वश्मि ॥13॥
परि णो हेती रुद्रस्य वृज्याः परि त्वेषस्य दुर्मतिर्मही गात् ।

अव स्थिरा मघवद्भ्यस्तनुष्व मीढ्वस्तोकाय तनयाय मृळ ॥14॥
एवा बभ्रो वृषभ चेकितान यथा देव न हृणीषे न हंसि ।
हवनश्रुन्नो रुद्रेह बोधि बृहद्वदेम विदथे सुवीराः ॥15॥

## 5.3.4 ऋग्वेदः → सूक्तम् 6.74

| | |
|---|---|
| ऋषिः | बार्हस्पत्यो भरद्वाजः |
| देवता | सोमारुद्रौ |
| छन्दः | त्रिष्टुप् |

सोमारुद्रा धारयेथामसुर्यं प्र वामिष्टयोऽरमश्नुवन्तु ।
दमेदमे सप्त रत्ना दधाना शं नो भूतं द्विपदे शं चतुष्पदे ॥1॥
सोमारुद्रा वि वृहतं विषूचीममीवा या नो गयमाविवेश ।
आरे बाधेथां निरृतिं पराचैरस्मे भद्रा सौश्रवसानि सन्तु ॥2॥
सोमारुद्रा युवमेतान्यस्मे विश्वा तनूषु भेषजानि धत्तम् ।
अव स्यतं मुञ्चतं यन्नो अस्ति तनूषु बद्धं कृतमेनो अस्मत् ॥3॥
तिग्मायुधौ तिग्महेती सुशेवौ सोमारुद्राविह सु मृळतं नः ।
प्र नो मुञ्चतं वरुणस्य पाशाद्गोपायतं नः सुमनस्यमाना ॥4॥

## 5.3.5 ऋग्वेदः → सूक्तम् 7.46

| | |
|---|---|
| ऋषिः | मैत्रावरुणिर्वसिष्ठः । |
| देवता | रुद्रः |
| छन्दः | जगती, 4 त्रिष्टुप् । |

इमा रुद्राय स्थिरधन्वने गिरः क्षिप्रेषवे देवाय स्वधाव्ने ।
अषाळ्हाय सहमानाय वेधसे तिग्मायुधाय भरता शृणोतु नः ॥1॥
स हि क्षयेण क्षम्यस्य जन्मनः साम्राज्येन दिव्यस्य चेतति ।

अवन्नवन्तीरुप नो दुरश्चरानमीवो रुद्र जासु नो भव ॥2॥
या ते दिद्युदवसृष्टा दिवस्परि क्ष्मया चरति परि सा वृणक्तु नः ।
सहस्रं ते स्वपिवात भेषजा मा नस्तोकेषु तनयेषु रीरिषः ॥3॥
मा नो वधी रुद्र मा परा दा मा ते भूम प्रसितौ हीळितस्य ।
आ नो भज बर्हिषि जीवशंसे यूयं पात स्वस्तिभिः सदा नः ॥4॥

### 5.3.6 ऋग्वेदः → सूक्तम् 8.63

| | |
|---|---|
| ऋषिः | प्रगाथः काण्वः |
| देवताः | इन्द्रः, 12 देवाः। |
| छन्दः | गायत्री, 4-5, 7 अनुष्टुप्, 12 त्रिष्टुप् । |

स पूर्व्यो महानां वेनः क्रतुभिरानजे । यस्य द्वारा मनुष्पिता देवेषु धिय आनजे ॥1॥
दिवो मानं नोत्सदन्सोमपृष्ठासो अद्रयः । उक्था ब्रह्म च शंस्या ॥2॥
स विद्वाँ अङ्गिरोभ्य इन्द्रो गा अवृणोदप । स्तुषे तदस्य पौंस्यम् ॥3॥
स प्रत्नथा कविवृध इन्द्रो वाकस्य वक्षणिः । शिवो अर्कस्य होमन्यस्मत्रा गन्त्ववसे ॥4॥
आदू नु ते अनु क्रतुं स्वाहा वरस्य यज्यवः । श्वात्रमर्का अनूषतेन्द्र गोत्रस्य दावने ॥5॥
इन्द्रे विश्वानि वीर्या कृतानि कर्त्वानि च । यमर्का अध्वरं विदुः ॥6॥
यत्पाञ्चजन्यया विशेन्द्रे घोषा असृक्षत । अस्तृणाद्बर्हणा विपोऽर्यो मानस्य स क्षयः ॥7॥
इयमु ते अनुष्टुतिश्चकृषे तानि पौंस्या । प्रावश्चक्रस्य वर्तनिम् ॥8॥
अस्य वृष्णो व्योदन उरु क्रमिष्ट जीवसे । यवं न पश्व आ ददे ॥9॥
तद्दधाना अवस्यवो युष्माभिर्दक्षपितरः । स्याम मरुत्वतो वृधे ॥10॥
बळृत्वियाय धाम्न ऋक्वभिः शूर नोनुमः । जेषामेन्द्र त्वया युजा ॥11॥
अस्मे रुद्रा मेहना पर्वतासो वृत्रहत्ये भरहूतौ सजोषाः ।
यः शंसते स्तुवते धायि पज्र इन्द्रज्येष्ठा अस्माँ अवन्तु देवाः ॥12॥

## 5.3.7 सामवेदः/कौथुमीया/संहिता/ग्रामगेयः/प्रपाठकः 02/रौद्रं(आवोराजा)

(सामवेदः/कौथुमीया/संहिता/पूर्वार्चिकः/छन्द आर्चिकः/1.1.1 प्रथमप्रपाठकः/1.1.1.7 सप्तमी दशतिः)

| ऋग्वेदः सूक्तम् 4.3 | |
|---|---|
| ऋषिः | वामदेवो गौतमः |
| देवताः | अग्निः, 1 रुद्रः। |
| छन्दः | त्रिष्टुप् |

आ वो राजानमध्वरस्य रुद्रं होतारं सत्ययजं रोदस्योः ।

अग्निं पुरा तनयित्नोरचित्ताद्धिरण्यरूपमवसे कृणुध्वं ॥ 69 ॥ ऋ. 4.3.1

## 5.4 List of Tables


Table 1. Etymological derivations of the word "Rudra" ........ 2
Table 2. Vyahṛti Upāsana in Pāṇinīya Śikṣā ........ 12
Table 3. Fivefold classification of Sanskrit syllables ........ 13
Table 4. Two types of effort - ābhyantara & bāhya prayatna in Pāṇinīya Śikṣa ........ 17
Table 5. Devatā, svara, varṇa and gotra details in Chandas. ........ 21
Table 6. Tattva, Graha and Rasa details in 8-gaṇās ........ 25
Table 7. Number of syllables in each Chandas and the Chandassūtra details. ........ 26
Table 8. Various types of Gāyatri and other Chandas. ........ 27
Table 9. Tattva darśanam in the 43 syllables of Maheśvara-sūtrās. ........ 44
Table 10. Topics covered in the 1-3 adhyāyās of Kāśyapa Nighaṇṭu. ........ 47
Table 11. Topics covered in the 1-4th adhyāya of Kāśyapa Nighaṇṭu ........ 49
Table 12. 3-gods (Agni, Indra, Sūrya) elaborated in the Nirukta, and their associations ........ 50
Table 13. List of described in the 5th adhyāya of Kāśyapa Nighaṇṭu ........ 51
Table 14. Comaprision of Nāma and Ākhyā described in Yāska's Nirukta ........ 54
Table 15. 3-types of relation between Śabda and Artha ........ 54
Table 16. Abhidhā, Lakṣaṇā and Vyañjanā vṛttīs described in Pratāpa-Rudrīyam. ........ 55
Table 17. Correlation of contents in Nighaṇṭu and Nirukta ........ 56
Table 18. Selected texts on 3-skandhās of Jyautiṣam ........ 60
Table 19. Details of time from Tṛṭi till Paramāyu in Sūrya-Siddhānta ........ 63
Table 20. 9-types of Kālamāna ........ 65
Table 21. 14-lokās described in Vyāsa-bhāṣyam on Yogasūtrās. ........ 66
Table 22. Lifespan and Breathing details in each Loka ........ 67
Table 23. Lifespan of Videhās and Pṛakrtilayās ........ 68
Table 24. List of Tithi's and their adhi-devatās in Pañcāṅga. ........ 69
Table 25. Details of each hora-adhipati and the week-names in Pañcāṅga. ........ 71
Table 26. Categorization of 27-nakṣatrās in Pañcāṅga. ........ 72
Table 27. Details of 27-Yogās in Pañcāṅga ........ 73
Table 28. Details of Cara and Sthira Karaṇās in Pañcāṅga. ........ 74
Table 29. List of 30-muhurtās in a day & night. ........ 74

Table 30. Kāraka-tattvās of 7-grahās in Bṛhat Parāśara Horā Śāstram........................................ 79
Table 31. Concept of Śri-Bhū-Nīla śakti's related to Triguṇās..................................................... 82
Table 32. List of available Kalpa-sūtrās for each Veda.............................................................. 85
Table 33. 3-types of Yajña (Pāka/Havis/Soma) and their 21-sub divisions. ................................ 86
Table 34. Division of 100 cows for 16-Ṛtviks of 4-groups ......................................................... 91
Table 35. Mantra-vibhāga & Āhuti's for 11-anuvākās of Namakam (Śatarudrīyam) ................. 91
Table 36. Iterations of Namaka & Chamaka Anuvakas in Rudra Homa ..................................... 92
Table 37. Namaka & Camaka Iteration details in the 4-types of Rudram. .................................. 93

## 5.5 List of Figures

Figure 1. Places of Articulation of Sanskrit syllables ........................................................ 15
Figure 2. Classification of Saṁskr̥ta-varṇās according to Pāṇinīya Śikśā.................................... 18
Figure 3. Graphical representation of 8-gaṇās ........................................................................ 26
Figure 4. Concept of Pañca-kr̥tyās through Maheśvara sūtrās. ................................................ 35
Figure 5. A solar-year with 12-saṅkrānti’s reflecting in a day of 60-nāḍīs .................................. 62
Figure 6. Calculation of Tithi.................................................................................................. 70
Figure 7. The order of grahas based on their Bhagaṇās............................................................ 72
Figure 8. Bha-cakra - 360° representation of grahās in a rāśi / nakṣatra. .................................... 76
Figure 9. Bhāva-cakra and the concept of Lagna in Jyautiṣam .................................................. 77
Figure 10. Representation of Bhāva-cakra in South-Indian style Kuṇḍali-chart. ........................ 77
Figure 11. Illustration of family-tree in the context of Rudra-mantra 10.5 ................................ 181

## 5.6 List of Paper publications

1. योगदर्शने ईश्वरप्रणिधानोपायेषु शतरुद्रीयस्य प्राशस्त्यम्
    - Journal of Veda Samskrita Academy (ISSN 2250-1711)
    - Volume 18: July-Dec 2021, p.82-91 http://vedasamskritaacademy.org

2. वेदाङ्गछन्दसि तत्त्वार्थ दर्शनम्
    - Journal of Veda Samskrita Academy (ISSN 2250-1711)
    - Volume 19: Jan-June 2022, p.10-14 http://vedasamskritaacademy.org

3. महेश्वरसूत्रेषु पातञ्जलदर्शनम्
    - Journal of Veda Samskrita Academy (ISSN 2250-1711)
    - Volume 20: July-Dec 2022. http://vedasamskritaacademy.org
    - (Accepted for Publication)

## 5.7 सहायक ग्रन्थाः

The following texts have been referenced while preparing this thesis.

| Classification | Text |
|---|---|
| Śatarudrīyam | • Saṃskṛta vyākhyānāḥ -- Sāyanācārya, Bhaṭṭa Bhāskara, Abhinava Śaṅkara, Viṣṇu Sūri, Skandha Deva, Govindācārya<br>• Other Telugu and English commentaries |
| Vedās | • Ṛgveda (Śakala Saṃhitā); Puruṣa sūktam; Rudra-sūktāni;<br>• Kṛṣṇa Yajurveda (Taittirīya Saṃhitā, Brāhmaṇam, Araṇyakam)<br>• Sāmaveda (Kauthuma Saṃhitā) |
| Vedāṅgāni | • Chandassūtram (Piṅgala); Chando Nirukti Vyākhyānam (Madhusūdana); Chandaḥkaustubham<br>• Śikṣā (Pāṇinī)<br>• Aṣṭādhyāyī (Pāṇinī); Dhātupāṭha (Pāninī); Laghu Śabdendu Śekharaḥ; Mahābhāṣyam (Patañjali); Nandikeśa Kāśikā & Tattva-vimarśinī (Upamanyu); Vākyapadīyam (Bhaṛtṛhari);<br>• Niruktam (Yāska)<br>• Bṛhat Pārāśara Horaśāstram; Yājuṣa Jyotiṣam; Sūrya Siddhānta; Bṛhat Saṃhitā (Varāhamihira)<br>• Āpastamba śrauta-gṛhya-dharma-śulva sūtrāṇi; Gautama dharmasūtrāni;<br>• Karma Vipākaḥ (Madana mahārṇavam); Manusmṛti |
| Upaniṣadaḥ | • 10- Mukhyopaniṣadaḥ<br>• Jābāli, Kaivalya, Nādabindu, Śvetāśvetara Upaniṣadaḥ |
| Yoga darśanam | • Yoga Sūtrāṇi (Patañjali) & Vyāsa bhāṣyam<br>• Haṭhayoga Pradīpikā (Svātmārāma); Śiva Saṃhitā<br>• Tattva bodha (Ādi Śankara) |
| Sāṅkhya darśanam | • Sāṅkhya Sūtrāṇi (Kapila)<br>• Sāṅkhya Kārikāḥ (Īśvara Kṛṣṇa) |
| Purāṇās & Itihāsās | • Mahābhāratam (Vyāsa) & Bhagavadgītā |

| | |
|---|---|
| | • Bhāgavata, Garuḍa, Agni, Śiva, Liṅga Purāṇāṇi<br>• Brahmāṇḍa Purāṇam (Lalitā Sahasra Nāma stotram) |
| Sāhitya Śāstram | • Nāṭya Śāstram (Bharata muni)<br>• Pratāpa Rudrīyam (Viśvanātha) |
| Ayurveda | • Caraka Saṃhitā |

Bibliography of these books is listed below.

**Śatarudrīyam:**


1. Namaka mantra pathamu - andhra padyanuvādamu; Nanduri Lakshmi Narasimharaya Kavi; Tirumala Tirupati Devasthanams; 2008.
2. Saprayoga Rudra Namaka Chamaka Bhashyam; M. Durga Mallikarjuna Prasad Shastri; Gollapudi Viraswami Sons; .
3. Śatarudrīyam - Ṣaḍvidha-pāṭha-bhedasahitam; Bannenje Govindacharya; Shri Hrishikesha Tirtha Sansthanam; 2013.
4. Śatarudrīyam - Tattvartha Sahitam (Telugu); RVR Krishnashastry; Sri Krshnananda matham; 2007.
5. Śrī Rudra bhāṣyam - Skandadeva proktaṃ Śivarahasye Ṣadvimśo.dhyāya; K.P. Narayana Sastry (Ed.); Chamarajendra Sanskrita Kalashala; 1994.
6. Sri Rudrabhisheka Mahatmyam - 2 volumes (Telugu); T. Rajeswara Sharma; Telugu Saraswata Sangham; 1982.
7. Sri Rudradhyaya with Critical notes and Advaitic commentary in English; M.C.R. Rao; Anu Prakāśan; .
8. Śrī Rudrādhyāyaḥ - Abhinavaśaṅkara bhāṣya sahitaḥ; ; Shri Vani Vilasa Mudranalaya; 1962.
9. Śrī Rudrādhyāyaḥ - Sāyaṇācārya - Bhaṭṭabhāskara bhāṣyābhyāṃ saṃvalitaḥ; ; Anandashrama Mudranalaya; 1888.
10. Śrī Rudrādhyāyaḥ - Viṣṇusūri bhāṣya saṃvalitaḥ; M. C. Apte (Ed.); Anandashrama Mudranalaya; 1958.
11. Sri Rudram and Chamakam; T.R. Rajagopala Aiyar; Bharatiya Vidya Bhavan; 1991.

12. Sri Rudram and Puruṣasuktam (English); Swami Amritananda; Sri Ramakrishna Math; 2018.
13. The Rudram - Translation, Grammatical and Etymological Notes; Narsing Rao; <eBook>; 2016.

**Vedās:**

14. Chaturveda Chandrika (Telugu); Ramavarapu Sharat Babu; Ānanda Lahari; 2017.
15. Chaturveda Samhita (Telugu); ; Vaidika Sahitya Prachara Samitih; 2006.
16. Krishna Yajurveda - Taittiriya Saṃhita; ; https://vedicheritage.gov.in/samhitas/yajurveda/krishna-yajurveda/taittiriya-samhita/; .
17. Mantrapushpam; Swami Devarupananda (Ed.); Sri Ramakrishna Math; 2013.
18. Ṛgveda - Śākala Saṃhitā; ; Https://Vedichheritage.Gov.In/Sanhitas/Rigveda/Shakala-Sanhita; .
19. Samaveda - Kauthuma Saṃhita; ; https://vedicheritage.gov.in/samhitas/samaveda-samhitas/kauthuma-samhita/; .
20. The Vedas; Sri Candrasekharrendra Saraswati; Bharatiya Vidya Bhavan; 2016.

**Vedāṅgaḥ - Chandas**

21. Chandaḥśāstram - Śrī Piṅgalanāga viracitaṃ - Śrī Hālayudhabhaṭṭa Mṛtasañjīvanī vṛtti sametam - Śrī Madhusūdana Chandonirukti sahitam; Pandit Kedaranath (Ed.); Nirnayasagar Press; 1938.
22. Chandassutram - Manorama vṛtti sahitam - Bhasha (hindi) vyakhyana; Radhakant Pandey; Ramakrishna Printing; .
23. Chandovallari - A Handbook of Sanskrit Prosody; Sampadananda Mishra; Sri Aurobindo Society; 2011.
24. Vedanga Chandas (Telugu); RVR Krishnashastry; Sri Krshnananda matham; 2006.

**Vedāṅgaḥ - Śikṣā**

25. Paniniya Sikṣa; ; Sri Krshnananda matham; 2006.
26. Paniniya Sikṣa - Critically edited in all its Five Recensions with an Introduction, Translation and Notes together with its two commentaries; Manomohan Ghosh; University of Calcutta; 1938.

27. Śikṣā sūtrāṇi – āpiśāli, pāṇinī, candragomī viracitāni; Yudhishthira Mimamsaka (Ed.); Bharatiya Prachya Vidya Prathishthan; 1967.


**Vedāṅgaḥ - Vyākaraṇam**


28. Aśṭādhyāyī sūtrapāṭha of Pāṇinī; ; Chaukhamba Publishers; 2014.
29. Dhātupāṭha - Pāṇinni praṇītam; ; Chaukamba Sanskrit Series Office; 1969.
30. Laghu Śabdenduśekhara - Nageśabhatta viracitam - Vaikuṇṭī (hindi) ṭīkā sahitam; Vaikunthanatha Shastry; Chaukhamba Surabharati Prakāśana; 1994.
31. Nandikesha Kashika - Aham pada nirvachanamu (Telugu); ; Sri Krshnananda matham; 2006.
32. Nandikesha Kashika - Upamanyu-krita Tattvavimarsini sahita and English Translation; K.S. Balasubramanian & T.V. Vasudeva; The Kuppuswami Sastri Research Institute; 2009.
33. Paniniya Ashtadhyayi - Vamana Jayaditya krita kashika vṛtti sahitam - 2 volumes, (Telugu); Ravva Srihari; Telugu Academy; 2015.
34. Patanjala Mahabhashya Vivartamu - navahnikam (Telugu translation); Kari Ramanujacharyulu; Telugu Academy; 1983.
35. Vākyapadīyam - Bhartṛhari praṇītaṃ – Harivṛṣabhakṛta Svopajña Vṛttisahitam – Prathama bhāgam,; ; Sampurnananda Sanskrit University; 1988.
36. Vakyapadiyam (Telugu translation) - 2 volumes; P. Sūryanarayana Sastri, S. Appalacharyulu, P.Sriramachandrudu, A. Somesvara Sharma; Telugu Academy; 2011.


**Vedāṅgaḥ - Niruktam**


37. Niruktamu - Nighantu Pātha Sahitamu (Telugu); Eswara Varaha Narasimhamu; Emesco Books; 2012.
38. Śabda Kalpadrumaḥ; ; Chaukamba Sanskrit Series Office; 1967.
39. The Nirukta of Yaska, with Nighantu; R.G. Bhadkamkar (Ed.); Bhandarkar Oriental Research Institute; 1942.
40. Vedic Nighantu - A critical study; G.N. Bhat; Mangalore University; 1992.


**Vedāṅgaḥ - Jyautiṣam**

41. Brihat Parashara Hora Shastram (English Translation); R. Santanam; Ranjan Prakāśan; 2000.
42. Brihat Samhita - with English Translation & Notes; V. Subrahmanya Sastri, M. Ramakrishna Bhat; V.B. Soobbiah & Sons; 1946.
43. Sūrya Siddhanta with the Gudartha Prakashika of Sri Ranganatha along with Hindi Translation Prakashika; Ramachandra Pandey; Chaukhamba Surbharati Prakāśan; 2014.
44. Vedanga Jyautisham (Telugu); RVR Krishnashastry; Sri Krshnananda matham; 2007.
45. Yajusha Jyotisham & Archa Jyotisham; Sudhakara Dvivedi (Ed.); Medical Hall Press; 1908.

**Vedāṅgaḥ - Kalpa-śāstrās**

46. Apastamba Dharmasutra with the commentary of Haradatta Mishra; A. Chinnaswami Sastri; Chaukamba Sanskrit Series Office; 1932.
47. Apastamba Grihyasutra with the commentaries of Haradatta Mishra and Sudarśana Acharya; A. Chinnaswami Sastri; Chaukamba Sanskrit Series Office; 1928.
48. Apastamba Srautasutra, with the commentaries of Dhurtaswami, Ramagnichit; So. Narasimachar (Ed.); Oriental Library Publications; 1944.
49. Apastamba Sulbasutra with the commentaries of Kapardiswami, Karavinda, Sundararaja; D. Srinivasachar (Ed.); Oriental Library Publications; 1931.
50. Char Shulbasutra - The Sulba Sutras of Baudhyam, Manav, Apastamba and Katyayana (with Hindi translation); Raghunath Purushotthama Kulkarni; Maharishi Sandipani Rashtriya Ved Vidya Pratishthan; 2000.
51. Gautama Dharmasutra with the commentary of Haradatta and Hindi translation; Promada Vardhana K.; Chaukhamba Vidya Bhawan; 2015.
52. Karma Vipākaḥ (Madana Mahārṇavam); Sannidhanam Sudarśana Sharma; Shri Venkateswara Veda Vishwavidyalayam; 2012.
53. Madana-mahārṇavam (Śri Viśveśvara Bhaṭṭa); E. Krishnamacharya, M.R. Nambiyar; Oriental Institute; 1953.
54. Manusmriti with the Manubhāshya of Medhatithi; Ganganath Jha (Ed.); The Asiatic Society of Bengal; 1932.
55. Veerasimhavaloka of Raja Virasimhadeva tomara with Hindi commentary; Radhakrishna Parashara; Chaukhamba Krishnadas Academy; 2015.

**Upaniṣadaḥ**

56. Eight Upaniṣads with the Commentary of Sankaracharya; Swami Gambhirananda; Advaita Ashrama; 1937.
57. Īśādi Aṣṭottaraśata Upaniṣadaḥ; Vasudev Lakshman Panashikar (Ed.); Chaukhamba Vidyabhawan; 2010.
58. Īśādi Daśopaniṣadaḥ - śrīmad Śaṅkarabhāṣyayutāḥ - Śrī Govindaśāstriṇā ṭippaṇībhiḥ samalaṅkṛtāḥ; ; Motilal Banarsidass Publishers; 1987.
59. Upaniṣad-darśanam - 108 upanishattulu (Telugu); Jayanti Chakravarti (Ed.); Navaratna Bookhouse; 2017.

**Darśana śāstrās – Yoga:**

60. Hathayoga Pradipika of Svatmarama with the Jyotsna tika of Brahmananda; ; Theosophical Publishing House; 1933.
61. Pātañjala Sūtrāṇi - Vyāsabhāṣya Vācaspatya sahitāni; Rajarama Shastri Bodas (Ed.); Nirnayasagar Press; 1892.
62. Patanjala Yogadarśanam - Vyasa Bhashyam, Hindi Vyakhyanam; Swami Hariharananda Aranya; Motilal Banarsidass; 1980.
63. Patanjala Yogasutrālu - Yogasudhakara Vṛtti; Sri Vidyaprakashanandagiri Swami; Sri Sukabrahmashramam; 2008.
64. Patanjala Yogasūtrani with the commentary of Vyasa and Vachaspati Mishra's tattva vaisharadi and Bhojadeva's Rajamarthanda; Hari Narayana Apte (Ed.); Anandashrama Mudranalaya; 1904.
65. Śiva Samhita with English Translation; Srisa Candra Vasu; The Panini Office; 1914.
66. Śiva Samhita with Hindi Translation; Raghvendra Sharma Raghav; Chaukhamba Sanskrit Pratishthan; 2017.
67. Tattvabodha of Sri Sankaracharya (English); Swami Tejomayananda; Chinmaya Prakāśan; 2013.
68. Yoga darśanam - Bālānandini (Telugu) Vyakhyanam; Pullela Srirama Chandrudu; Arsha Vijnana Trust; 2001.
69. Yoga darśanam - Bhashyartha Prakashika (Telugu) Vyakhyanam; T.K Tiruvengadacharyulu; Vyasa-ashramam; 2013.

**Darśana śāstrās – Sāṅkhya:**

70. Saṅkhya darśanam, Kapila maharṣi - Vijñanabhikṣu Pravacana-bhāṣyam - Pradīpa Hindi Vyākhyānam; Gajanana Shastri M.; Chakhamba Sanskrit Sansthan; 2013.
71. Sāṅkhya-Karika, A treatise on Sāṅkhya Philosophy by Īśvara Krishna with a commentary by Goudapada-Swami; ; The Pandit Narayan Moolji Pustakalaya; 1929.
72. Sāṅkhyakārikāḥ - Īśvara Kṛṣṇa viracitaḥ - Gauḍapāda bhāṣya sahitaḥ; ; Chaukamba Sanskrit Series Office; 1963.

**Purāṇetihāsās (including Bhagavadgīta):**

73. Agni Maha-puranam with Hindi Translation; Surakant Jha; Chaukamba Sanskrit Series Office; 2019.
74. Bhagavadgītā - Śaṅkarabhāṣyeṇa – Ānandagiri vyākhyāyujā saṃvalitā – Nīlakaṇṭhī bhāṣyotkarṣa-dīpikā – Śrīdharīya subodhinī – Abhinavaguptācārya vyākhyā – Madhusūdana Sarasvatī svāmi Gūḍhārthadīpikā vyākhyāsahitā – Śrī dharmadatta Śarma Gūḍhārthatattvālokena yutā ca; ; Nirnayasagar Press; 1936.
75. Bhagavadgīta - Gitamakarandamu (Telugu) vyakhyanam; Sri Vidyaprakashanandagiri Swami; Sri Sukabrahmashramam; 2016.
76. Bhāgavata mahāpurāṇam - Śrī Vedavyāsa maharṣi praṇītam (Telugu) 2 volumes; ; Gita Press; 2016.
77. Garuda Maha-puranam with Hindi Translation; Radhika Raman; Chaukhamba Krishnadas Academy; 2015.
78. Lalita Sahasra Nama stotram - Bhatta Narayana Jayamangala Vykhyanam; ; Bharatiya Kala Prakāśan; 2007.
79. Liṅgapurāṇaṃ dvitīyakhaṇḍam - Śrī Vedavyāsa maharṣi praṇītaṃ (Hindi); Sri Ramasharma Acharya; Sanskriti Sansthana; 1971.
80. Mahābhāratam - Śrī Vedavyāsa maharṣi praṇītaṃ - 7-volumes (Telugu); ; Gita Press; 2018.
81. Śiva Mahapurana with Hindi Translation (2-volumes); ; Gita Press; 2019.

**Sāhitya Śāstrās:**

82. Natyashastram - Bharatamuni Pranitam - Balanandini Telugu vyakhyanam; Pullela Srirama Chandrudu; P.S.Shastri Prakāśan; 2014.

83. Pratāparudrīyam - Sri Vidyanatha virachitam - Ratnapana tika sahitam; Utpala Venkata Narasimhacharya (Ed.); Vavilla Ramasvamy Shastrulu & Sons; 1934.

**Āyurveda:**

84. Caraka Saṃhitā - Cakrapāṇidatta Ayurveda-dīpikā vyākhyā-sahitā; ; Chaukhamba Surabharati Prakāśana; 2016.

**Sanskrit Wiki-source** – https://sa.wikisource.org - has the Unicode text for various scriptures.

Let this svādhyāya, be concluded with this maṅgala-śloka:

नमो रुद्राय द्रव्यशक्तिप्रदाय च तमोपहाय
नमो ब्रह्मणे क्रियाशक्तिप्रदाय च रजोहराय ।
नमो विष्णवे ज्ञानशक्तिप्रदाय च सत्त्वातीताय
नमो निर्गुणाय च त्र्यम्बकाय नमो नमः शिवाय ॥

- Surrendering to the form of Rudra, the bestower of Dravya-Śakti (the cause of all Bhūtās), and the remover of Tamo-guṇa;
- Surrendering to the form of Brahmā, the bestower of Kriyā-Śakti (the cause of all Indriyās), and the remover of Rajo-guṇa;
- Surrendering to the form of Viṣṇu, the bestower of Jñāna-Śakti (the cause of Antaḥkaraṇa), and being beyond Sattva-guṇa;
- Surrendering to him, who is beyond tri-guṇās, and who has three-eyes (to see all the three-lokās), I surrender my'self' to that Śiva.

॥ ॐ नमो भगवते रुद्राय ॥